भ्राचा सह मया चैव पुनः प्रत्यागमिष्यति ॥”) पूर्णम्। इत्यमरः ॥ (यथा, महाभारते। १।१५४।१३।
“अवेत्यमायतस्याश्च हिडिम्बो मानुषं वपुः।
स्रग्दामपूरितशिखं समग्रेन्दुनिभाननम् ॥”)

समङ्गा, स्त्री, मञ्जिष्ठा। इत्यमरः। लज्जालुलता। वराहक्रान्ता। इति रत्नमाला ॥ बला। इति राजनिर्घण्टः ॥

समचित्तं, क्ली, (समं तुल्यं चित्तम्।) एकविषयकान्तःकरणवृत्तिः। यथा,—
“मनो बुद्धिश्च चित्तञ्च ते ज्ञानीशाः शरीरिणाम्।
एकचित्तं मनः कृत्वा ज्ञानेन पृथुलोचने ॥
समचित्तं प्रपद्यन्ते न ते लिप्यन्ति मानवाः।
सर्व्वभक्ष्याणि भक्षन्तः पेयापेयं तथैव च।
समं चित्तं मयि यदि तदा तस्य न च क्रिया ॥”
इति वाराहे गुह्यकर्म्ममाहात्म्यवर्णनं नामाध्यायः ॥ (समं सर्व्वेषु पदार्थेषु तुल्यरूपं चित्तं यस्येति विग्रहे सर्व्वत्र तुल्यदर्शके, त्रि। यथा, भागवते। ७।१३।६।
“न यतेराश्रमः प्रायो धर्म्महेतुर्महात्मनः।
शान्तस्य समचित्तस्य विभृयादुत वा त्यजेत् ॥”)

समजं, क्ली, (समजन्ति पशवो यत्र। सम्+अज गतौ+अप्।) वनम्। इति मेदिनी ॥

समजः, पुं, (सं+अज गतौ+“समुदोरजः पशुषु।” ३।३।६९। इति अप्।) पशुसमूहः। इत्यमरः ॥ मूर्खसंहतिः। इति शब्दरत्नावली ॥

समज्ञा, स्त्री, (समैः सर्व्वैर्ज्ञायते इति। ज्ञा+घञर्थे कः।) कीर्त्तिः। इत्यमरः ॥ समाज्ञा समज्या समाख्या इति च पाठः। इति भरतः ॥

समज्या, स्त्री, (समजन्ति सङ्गच्छन्तेऽस्यामिति। सम्+अज+“संज्ञायां समजनिषदेति।” ३।३।९९। इति क्यप्।) सभा। इत्यमरः ॥ कीर्त्तिः। इति तट्टीकायां रायमुकुटः ॥

समञ्जसं, क्ली, (सम्यक् अञ्ज औचित्यं यत्र। अच्।) उचितम्। इत्यमरः ॥

समञ्जसः, त्रि, (सम्यक् अञ्ज औचित्यं यत्र। अच्।) समीचीनः। इति त्रिकाण्डशेषः ॥ (यथा, भागवते। ६।६।३५।
“आहोस्विदात्माराम उपशमशील: समञ्जसदर्शन उदास्त इतिह वाव न विदाम ॥”) अभ्यस्तः। इत्यजयपालः ॥

समठः, पुं, गम्भीरः। इति शब्दरत्नावली हारावली च ॥

समता, स्त्री, समत्वम्। समस्य भावः इत्यर्थे सम शब्दात् तप्रत्ययेन निष्पन्ना ॥ (यथा, रघुः। ८।६।
“समतया वसुवृष्टिविसर्ज्जनै-
र्नियमनादसताञ्च नराधिपः ॥”)

समतिरिक्तं, क्ली, सम्यगधिकम्। सम्यक्प्रकारेणातिरिक्तं इति तत्पुरुषसमासनिष्पन्नम् ॥

समत्रयं, क्ली, (समं त्रयं यत्र।) समभागहरीतकीनागरगुडम्। इति राजनिर्घण्टः ॥

समदर्शी, [न्] त्रि, (समं पश्यतीति। दृश्+णिनिः।) सर्व्वभूतेषु तुल्यदर्शनशीलः। यथा,—
“विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥”
इति श्रीभगवद्गीता ॥

समदृष्टिः, स्त्री, (समा दृष्टिः।) सर्व्वत्र तुल्यदर्शनम्। यथा,—
“दुःखे सुखे च विप्रेन्द्र या दृष्टिर्व्वर्त्तते सदा।
तथा शत्रौ च मित्रे च समदृष्टिश्च सा स्मृता ॥”
इति पाद्मे क्रियायोगसारे १६ अध्यायः ॥ (समा दृष्टिर्यस्य।) समदर्शिनि, त्रि ॥

समधिकः, त्रि, (सम्यक् अधिकः।) अधिकः। तत्पर्य्यायः। अतिरिक्तः २। इत्यमरः ॥ (यथा, रघुः। १८।५३।
“प्रतिकृतिरचनाभ्यो दूतिसन्दर्शिताभ्यः
समधिकतररूपाः शुद्धसन्तानकामैः।
अधिविविदुरमात्यैराहृतास्तस्य यूनः
प्रथमपरिगृहीते श्रीभुवौ राजकन्याः ॥”)

समन्तः, पुं, सीमा। सम्यक्प्रकारेण अन्तः इति तत्पुरुषसमासनिष्पन्नः ॥

समन्ततः, [स्] अ, चतुर्द्दिगभिव्याप्तः। तत्पर्य्यायः। परितः २ सर्व्वतः ३ विष्वक् ४। इत्यमरः ॥ समन्तात् ५। इति शब्दरत्नावली ॥ (यथा, रामायणे। २।५७।३४।
“स्त्रियश्च सर्व्वा रुरुदुः समन्ततः
पुरं तदासीत् पुनरेव सङ्कुलम् ॥”)

समन्तदुग्धा, स्त्री, (समन्तात् दुग्धं क्षीरमस्याः।) स्नुहीवृक्षः। इत्यमरः ॥

समन्तपञ्चकं, क्ली, (समन्तात् पञ्चकं ह्रदपञ्चकं यत्र।) कुरुक्षेत्रम्। तच्च कुरुपाण्डवयोर्युद्धस्थानम्। तत्र पुरा परशुरामः क्षत्रियरुधिरेण पञ्च ह्रदान् चकार। यथा,—
“त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्त्रियां प्रभुः।
समन्तपञ्चके पञ्च कृतवान् रुधिरैर्ह्रदान् ॥
स तेषु तर्पयामास पितॄन् भृगुकुलोद्वहः।
साक्षात् ददर्श पितरं स च रामं न्यवारयत् ॥”
इति पाद्मे भूमिखण्डे १२४ अध्यायः ॥*॥
अन्यच्च।
“त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्त्रियां प्रभुः।
समन्तपञ्चके चक्रे शोणितोदान् ह्रदान् नव ॥”
इति श्रीभागवते ९ स्कन्धे १६ अध्यायः ॥*॥
तस्य माहात्म्यं सीमा च यथा,—
“पृथिव्यां नैमिषं तीर्थमन्तरीक्षे च पुष्करम्।
त्रयाणामपि लोकानां कुरुक्षेत्रं विशिष्यते ॥”
इत्यारभ्य,—
“तरन्तुकारन्तुकयोर्यदन्तरं
रामह्रदानाञ्च मचक्रुकस्य च।
एतत् कुरुक्षेत्रसमन्तपञ्चकं
पितामहस्योत्तरवेदिरुच्यते ॥”
इति महाभारतीयवनपर्व्वणि ८३ अध्यायः ॥

समन्तभद्रः, पुं, (समन्तात् भद्रमस्य।) बुद्धः। इत्यमरः ॥

समन्तभुक्, [ज्] पुं, (समन्तात् भुङ्क्ते इति। भुज्+क्विप्।) अग्निः। इति त्रिकाण्डशेषः ॥

समन्तात्, अ, समन्ततः। इति शब्दरत्नावली ॥ (यथा, ऋतुसंहारे। १।२२।
“दिनकरपरितापात् क्षीणतोयाः समन्तात्
विदधति भयमुच्चैर्वीक्ष्यमाणा वनान्ताः ॥”)

समन्युः, पुं, (मन्युना क्रतुना क्रोधेन वा सह वर्त्तमानः।) शिवः। इति केचित् ॥ क्रोधयुक्तश्च ॥ (यथा, महाभारते। ३।२६८।४।
“बुद्धिं समाच्छाद्य च मे समन्यु-
रुद्धूयते प्राणपतिः शरीरे ॥”)

समन्वितः, त्रि, (सम्+अनु+इण्+क्तः।) संयुक्तः। यथा, तिथ्यादितत्त्वे।
“विसृष्टमद्भुतं शान्तं सष्टाक्षरपदं तथा।
कलस्वरसमायुक्तं रसभावसमन्वितम् ॥”

समपदं, क्ली, (समे पदे यत्र।) धन्विनां पादयोस्तुल्यरूपतया धारणम्। इत्यमरटीकायां भरतः ॥

समपदः, पुं, (समे पदे चरणौ यत्र।) रतिबन्धविशेषः। यथा,—
“योषित्पादौ हृदि स्थाप्य कराभ्यां पीडयेत् स्तनौ।
यथेष्टं ताडयेद्योनिं बन्धः समपदः स्मृतः ॥”
इति रतिमञ्जरी स्मरदीपिका च ॥

समपादं, क्ली, (समौ पादौ यत्र।) धन्विनां पादयोस्तुल्यरूपतया धारणम्। इति हेमचन्द्रः ॥

समभिव्याहारः, पुं, (सम्+अभि+वि+आ+हृ+घञ्।) सहितः। घटमानय इत्यत्र भवति चाव्यवहितपूर्ब्ववर्त्तितात्मकसमभिव्याहारसम्बन्धेन घटपदनिष्ठस्यानुस्वारपदस्य व्यतिरेकप्रयुक्तो घटवत् कर्म्मत्वमिति भेदान्वयबुद्ध्यभाव इति तादृशान्वयबोधे घटपदस्यानुस्वारपदवत्त्वमाकाङ्क्षा एवं विनिगमनाविरहादव्यवहितोत्तरवर्त्तितारूपसमभिव्याहारसम्बन्धेन अनुस्वारपदनिष्ठस्य घटपदस्य व्यतिरेकप्रयुक्तोऽपि घटवत् कर्म्मत्वमिति भेदान्वयबुद्ध्यभाव इत्यनुस्वारपदस्य घटपदवत्त्वमपि तादृशान्वयबोधे आकाङ्क्षा। इति आकाङ्क्षाग्रन्थे मथुरानाथः ॥

समभिव्याहृतः, पुं, (सम्+अभि+वि+आ+हृ+क्तः।) सहोच्चरितः। सहितः। यथा निमित्तानां उत्पत्तिविधिसमभिव्याहृतनियतानाम्। इति तिथ्यादितत्त्वम् ॥

समभिहारः, पुं, (सम्+अभि+हृ+घञ्।) पौनःपुन्यम्। भृशार्थः। इति मेदिनी ॥

समभूमिः, स्त्री, (समा भूमिः।) समानस्थानम् तत्पर्य्यायः। आजिः २। इति जटाधरः ॥ (यथा, रामायणे। २।५६।११।
“समभूमितले रम्ये द्रुमैर्बहुभिरावृते।
पुण्ये रंस्यामहे तात चित्रकूटस्य कानने ॥”)

समम्, अ, सहितम्। यथा। साकन्तु साकं सत्रं समं सह। इत्यमरः ॥ (यथा, मनुः। २।११३।